महेश्वरः ७ वृषाकपिः ८ शम्भुः ९ हरणः १० ईश्वरः ११ । इति महाभारते दानधर्म्मः ॥ * ॥ अपि च ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः ।
वैवस्वतश्च सावित्रो हरो रुद्रा इमे स्मृताः ॥"

इति जटाधरः ॥ * ॥

अन्यच्च ।

"अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च वीर्य्यवान् ।
त्वष्टुश्चाप्यात्मजः पुत्रो विश्वरूपो महातपाः ॥
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा ॥
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ॥"

इति गारुडे ६ अध्यायः ॥

अग्निपुराणे तद्ध्याने कृत्तिवासाः ॥ * ॥ अपरञ्च ।

"अजैकपदाहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश गणेश्वराः ॥
एतेषां मानसानान्तु त्रिशूलवरधारिणाम् ।
कोटयश्चतुरशीतिस्तत् पुत्राश्चाक्षया मताः ॥
दिक्षु सर्व्वासु ये रक्षां प्रकुर्व्वन्ति गणेश्वराः ।
पुत्रपौत्रसुतास्त्वेते सुरभीगर्भसम्भवाः ॥"

इति मात्स्ये ५ अध्यायः ॥ * ॥

तस्य उत्पत्तिर्यथा,—

"प्रजाः स्रष्टुमनास्तेपे तपः परमदुश्चरम् ।
तस्यैवं तप्यमानस्य न किञ्चित् समवर्त्तत ॥
ततो दीर्घेण कालेन दुःखात् क्रोधो व्यजायत ।
क्रोधाविष्टस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः ॥
ततस्तेभ्योऽश्रुबिन्दुभ्यो भूताः प्रेतास्तदाभवन् ।
सर्व्वांस्तानग्रजान् दृष्ट्वा ब्रह्मात्मानमनिन्दत ॥
तदा प्राणमयो रुद्रः प्रादुरासीत् प्रभोर्मुखात् ।
सहस्रादित्यसङ्काशो युगान्तदहनोपमः ॥
रुरोद सस्वरं घोरं देवदेवः स्वयं शिवः ।
रोदमानं तदा ब्रह्मा मारोदीरित्यभाषत ।
रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्यसि ॥
अन्यानि सप्तनामानि पत्नीः पुत्रांश्च शाश्वतान् ।
स्थानानि चैषामष्टानां ददौ लोकपितामहः ॥
भवः शर्व्वस्तथेशानः पशूनाम्पतिरेव च ।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणश्चन्द्र इत्येता अष्टमूर्त्तयः ॥
स्थानेषु तेषु ये रुद्रं ध्यायन्ति मनुजाधिप ।
तेषामष्टतनुर्देवो ददाति परमं पदम् ॥
सुवर्च्चला तथैवोमा विकेशा च शिवा तथा ।
स्वाहा दिशा च दीक्षा च रोहिणीति च पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैषां सुताः स्मृताः ॥"

इति कौर्म्मे १० अध्यायः ॥ * ॥

विष्णुरुद्रयोरभेदो यथा,—

"सदैव देवो भगवान् महादेवो न संशयः ।
मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुमीश्वरात् ।
मोहादवेदनिष्ठाद्वा ते यान्ति नरकं नराः ॥
वेदानुवर्त्तिनं रुद्रं देवं नारायणन्तथा ।
एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते ॥"

इति च तत्रैव १२ अध्यायः ॥ * ॥

कल्पभेदे तस्योत्पत्तिनामस्थानभार्य्यादीनि यथा,

"चुकोप च ततो ब्रह्मा ज्वलन्निव हुताशनः ।
ततः कोपं स्वपुत्रेभ्यः क्षतमन्याय्यमित्यपि ॥
विचार्य्य परिवर्द्धन्तं नियन्तुमुपचक्रमे ।
यत्नान्नियम्यमानोऽपि स कोपः परमेष्ठिनः ॥
भ्रुवोर्म्मध्यादथोद्भूतः कुमारो नीललोहितः ।
जातमात्रः कुमारोऽसौ रुरोद भगवान् भवः ॥
ब्रह्मोवाच कथं पुत्र रोदिषि त्वं महाबल ।
तन्मे कथय कामन्ते सद्यः सम्पादयाम्यहम् ॥
रुद्र उवाच ।
नामानि कुरु मे ब्रह्मन् ! स्थानानि च जगद्गुरो ।
पत्नीश्च देहि भगवन् ततः शान्तिर्भविष्यति ॥
ब्रह्मोवाच ।
जानामि त्वां देवदेवं पूर्व्वं दत्तं वरं मम ।
सत्यं कर्त्तुं भवान् जातस्त्वं हि सर्व्वेश्वरेश्वरः ॥
जातमात्रो रोदिषि त्वं ततो रुद्र इति स्मृतः ।
नामान्यन्यानि ते देव विधास्ये शृणु पुत्रक ॥
ऋतध्वजो मनुर्मन्युरुग्ररेता महान् शिवः ।
भवः कालो महिनसो वामदेवो धृतव्रतः ॥
एतानि तव नामानि ये स्मरन्ति नरा भुवि ।
तेषां सदैव कल्याणं करिष्यसि महामते ॥
स्थानानि च प्रवक्ष्यामि तेषु वासो विधीयताम् ॥
इन्द्रियाण्यसुहृद्व्योम वायुरग्निर्जलं मही ।
तपश्चन्द्रश्च सूर्य्यश्च स्थानान्येतानि ते भव ॥
धृतिर्धीरसिलोमा च नियुत् सर्पिर्व्विलम्बिका ।
इरावती स्वधा दीक्षा योषितस्तव सुन्दरी ॥
प्रजाः सृज महाभाग जगदेतत् प्रपूरय ॥
इत्यादिष्टः स भगवान् ब्रह्मणा नीललोहितः ।
सृष्टवान् स प्रजा वक्रीभूतप्रेतपिशाचकान् ।
कुष्माण्डान् विकृताकारान् भैरवान् भीमनादिनः ॥
तान् दृष्ट्वा तु तदा ब्रह्मा जगद्विद्रावकान् बहून् ।
वारयामास पुत्र त्वं मा स्राक्षीरीदृशीः प्रजाः ॥
तपसा विष्णुमाराध्य विहरस्व यथासुखम् ।
इति ते कथितो राजन् ! रुद्रसर्गः प्रजापतेः ॥
यं श्रुत्वापि नरः सद्यो जह्याद्भूतकृतं भयम् ॥"

इति पाद्मे स्वर्गखण्डे रुद्रसर्गः ८ अध्यायः ॥ * ॥

प्रकारान्तरं यथा,—

"कथितस्तामसः सर्गो ब्रह्मंस्तेऽयं महामुने ।
रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥
कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः ।
प्रादुरासीत् प्रभोरङ्के कुमारो नीललोहितः ॥
रुदन् वै सस्वरं सोऽथ द्रवंश्च द्विजसत्तम ! ।
किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच वै ॥
नाम देहीति तं सोऽथ प्रत्युवाच प्रजापतिम् ।
रुद्रस्त्वं देव नाम्नासि मारोदीर्धैर्य्यमावह ॥
एवमुक्तः पुनः सोऽथ सप्तकृत्वो रुरोद वै ।
ततोऽन्यानि ददौ तस्मै सप्त नामानि स प्रभुः ॥
स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च वै प्रभुः ॥
भवं शर्व्वमथेशानं तथा पशुपतिं द्विज ।
भीममुग्रं महादेवमुवाच स पितामहः ॥
चक्रे नामान्यथैतानि स्थानान्येषां चकार सः ॥
सूर्य्यो जलं मही वह्निर्व्वायुराकाशमेव च ।
दीक्षितो ब्राह्मणः सोम इत्येतास्तनवः क्रमात् ॥
सुवर्च्चला तथैवोषा सुकेशी चापरा शिवा ।
स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमम् ॥
सूर्य्यादीनां नरश्रेष्ठ रुद्राद्यैर्नामभिः सह ।
पत्न्यः स्मृता महाभाग तदपत्यानि मे शृणु ॥
येषां सूतिप्रसूतैश्च इदमापूरितं जगत् ।
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥
स्कन्दः सर्गोऽथ सन्तानो बुधश्चानुक्रमात् सुताः ।
एवंप्रकाररुद्रोऽसौ सतीं भार्य्यामविन्दत ॥
दक्षकोपाच्च तत्याज सा सती स्वं कलेवरम् ।
हिमवद्दुहिता साभून्मेनायां द्विजसत्तम ! ॥
उपयेमे पुनश्चोमामनन्यां भगवान् भवः ॥
देवौ धाता विधातारौ भृगोः ख्यातिरसूयत ।
श्रियञ्च देवदेवस्य पत्नी नारायणस्य या ॥"

इति विष्णुपुराणे १ अंशे ८ अध्यायः ॥ * ॥

("द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम् ।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः ॥
तपोविघ्नं शमीकर्त्तुन्तपोविघ्नं महात्मनाम् ।
पश्यन् समर्थश्चोपेक्षाञ्चक्रे दक्षः प्रजापतिः ॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षः प्रजापतिः ।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि ॥
पाशुपत्य ऋचो याश्च श्रेयश्चाहुतयश्च याः ।
यज्ञसिद्धिकृतस्ताभिर्हीनश्चैव स इष्टवान् ॥
अथोत्तीर्णव्रतो देवो बुद्धा दक्षव्यतिक्रमम् ।
रुद्रो रौद्रं पुरस्कृत्य भावमात्मविदात्मनः ॥
सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः ।
बालं क्रोधाग्निसन्तप्तमसृजत् शत्रुनाशनम् ॥
ततो यज्ञः स विध्वस्तो व्यथिताश्च दिवौकसः ।
दाहव्यथा परीताश्च भ्रान्ता भूतगणा दिशः ॥"

इति चरके चिकित्सास्थाने तृतीयेऽध्याये ॥)

रुद्रगीता वराहपुराणे द्रष्टव्या ॥ * ॥ (विश्वकर्म्मपुत्रविशेषः । यथा, विष्णुपुराणे । १ । १५ । १२२ ।

"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु ।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥")

स्वनामख्यातः कविविशेषः । स च विद्याविलासपुत्रः भावविलासप्रणेता । कविरयं मानसिंहपुत्रस्य भावसिंहमहीपतेः समये बभूव । स च भावसिंहमहीपतिर्व्वर्त्तमानजयपुरमहाराजस्य षोडशः पूर्व्वपुरुषः । तथा च भावविलासे । १३४—१३६ ।